শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

## শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে কিষ্কিন্ধাকাণ্ডে

# ॥ অষ্টচৎৱারিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ অষ্টচত্বারিংশঃ সর্গঃ ॥

## দক্ষিণদিগ্গতৈর্বানরৈঃ সীতানুসন্ধানস্য প্রারম্ভণম্

সহ তারাঙ্গদাভ্যাং তু সহসা হনুমান্ কপিঃ।
সুগ্রীবেণ যথোদ্দিষ্টং গন্তুং দেশং প্রচক্রমে॥ **4.48.1** ॥

স তু দূরমুপাগম্য সর্বৈস্তৈঃ কপিসত্তমৈঃ।
ততো বিচিত্য বিন্ধ্যস্য গুহাশ্চ গহনানি চ॥ **4.48.2** ॥

পর্বতাগ্রনদীদুর্গান্ সরাংসি বিপুলদ্রুমান্।
বৃক্ষখণ্ডাংশ্চ বিবিধান্ পর্বতান্ বনপাদপান্॥ **4.48.3** ॥

অন্বেষমাণাস্তে সর্বে বানরাঃ সর্বতোদিশম্।
ন সীতাং দদৃশুর্বীরা মৈথিলীং জনকাত্মজাম্॥ **4.48.4** ॥

তে ভক্ষযন্তো মূলানি ফলানি বিবিধান্যপি।
অন্বেষমাণা দুর্ধর্ষা ন্যবসংস্তত্র তত্র হ॥ **4.48.5** ॥

স তু দেশো দুরন্বেষো গুহাগহনবান্ মহান্।
নির্জলং নির্জনং শূন্যং গহনং ঘোরদর্শনম্॥ **4.48.6** ॥

তাদৃশান্যপ্যরণ্যানি বিচিত্য ভৃশপীডিতাঃ।
স দেশশ্চ দুরন্বেষ্যো গুহাগহনবান্ মহান্॥ **4.48.7** ॥

ত্যক্ত্বা তু তং ততো দেশং সর্ৱে ৱৈ হরিযূথপাঃ।
দেশমন্যং দুরাধর্ষং ৱিৱিশুশ্চাকুতোভযাঃ॥ **4.48.8** ॥

যত্র ৱন্ধ্যফলা ৱৃক্ষা ৱিপুষ্পাঃ পর্ণৱর্জিতাঃ।
নিস্তোযাঃ সরিতো যত্র মূলং যত্র সুদুর্লভম্॥ **4.48.9** ॥

ন সন্তি মহিষা যত্র ন মৃগা ন চ হস্তিনঃ।
শার্দূলাঃ পক্ষিণো ৱাপি যে চান্যে ৱনগোচরাঃ॥ **4.48.10** ॥

ন চাত্র ৱৃক্ষা নৌষধ্যো ন ৱল্ল্যো নাপি ৱীরুধঃ।
স্নিগ্ধপত্রাঃ স্থলে যত্র পদ্মিন্যঃ ফুল্লপঙ্কজাঃ॥ **4.48.11** ॥

প্রেক্ষণীযাঃ সুগন্ধাশ্চ ভ্রমরৈশ্চ ৱিৱর্জিতাঃ।
কণ্ডুর্নাম মহাভাগঃ সত্যৱাদী তপোধনঃ॥ **4.48.12** ॥

মহর্ষিঃ পরমামর্ষী নিযমৈর্দুষ্প্রধর্ষণঃ।
তস্য তস্মিন্ ৱনে পুত্রো বালকো দশৱার্ষিকঃ॥ **4.48.13** ॥

প্রণষ্টো জীৱিতান্তায ক্রুদ্ধস্তেন মহামুনিঃ।
তেন ধর্মাত্মনা শপ্তং কৃৎস্নং তত্র মহদ্ৱনম্॥ **4.48.14** ॥

অশরণ্যং দুরাধর্ষং মৃগপক্ষিৱিৱর্জিতম্।
তস্য তে কাননান্তাংস্তু গিরীণাং কন্দরাণি চ॥ **4.48.15** ॥

প্রভৱাণি নদীনাং চ ৱিচিন্ৱন্তি সমাহিতাঃ।
তত্র চাপি মহাত্মানো নাপশ্যঞ্জনকাত্মজাম্॥ **4.48.16** ॥

হর্তারং রাৱণং ৱাপি সুগ্রীৱপ্রিযকারিণঃ।
তে প্রৱিশ্য তু তং ভীমং লতাগুল্মসমাৱৃতম্॥ **4.48.17** ॥

দদৃশুর্ভীমকর্মাণমসুরং সুরনির্ভযম্।
তং দৃষ্টৱা ৱানরা ঘোরং স্থিতং শৈলমিৱাসুরম্॥ **4.48.18** ॥

গাঢং পরিহিতাঃ সর্ৱে দৃষ্টৱা তং পর্ৱতোপমম্।
সোঽপি তান্ ৱানরান্ সর্ৱান্ নষ্টাঃ স্থেত্যব্রৱীদ্ বলী॥ **4.48.19**॥

অভ্যধাৱত সঙ্ক্রুদ্ধো মুষ্টিমুদ্যম্য সঙ্গতম্।
তমাপতন্তং সহসা ৱালিপুত্রোঽঙ্গদস্তদা॥ **4.48.20**॥

রাৱণোঽযমিতি জ্ঞাৎৱা তলেনাভিজঘান হ।
স ৱালিপুত্রাভিহতো ৱক্ত্রাচ্ছোণিতমুদ্বমন্॥ **4.48.21**॥

অসুরো ন্যপতদ্ ভূমৌ পর্যস্ত ইৱ পর্ৱতঃ।
তে তু তস্মিন্ নিরুচ্ছ্ৱাসে ৱানরা জিতকাশিনঃ॥ **4.48.22**॥

ৱ্যচিন্ৱন্ প্রাযশস্তত্র সর্ৱং তে গিরিগহ্ৱরম্।
ৱিচিতং তু ততঃ সর্ৱং সর্ৱে তে কাননৌকসঃ॥ **4.48.23**॥

অন্যদেৱাপরং ঘোরং ৱিৱিশুর্গিরিগহ্ৱরম্।
তে ৱিচিত্য পুনঃ খিন্না ৱিনিষ্পত্য সমাগতাঃ।
একান্তে ৱৃক্ষমূলে তু নিষেদুর্দীনমানসাঃ॥ **4.48.24**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
কিষ্কিন্ধাকাণ্ডে অষ্টচৎৱারিংশঃ সর্গঃ॥